# संस्कृत-वार्ता:

दिनाङ्क :- 07.10.2024

प्रात: - 06:55

## प्रधानमंत्री-मालदीवराष्ट्रपतिः –

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदिल्ल्यां मालदीवदेशीयेन राष्ट्रपतिना डॉ. मोहम्मद मुइज्जु इत्यमुना साकं द्विपक्षीयवार्तानाम् पारस्परिक-कल्याणस्य च अन्ताराष्ट्रीय- प्रसङ्गेषु चर्चां विधास्यति। एतस्य उपनेशनस्य अनन्तरम् उभयोर्मध्ये अनेकेषां सन्धिपत्राणां विनिमयमपि भविष्यति उपवेशनात् प्राक् मालदीवस्य राष्ट्रपतेः राष्ट्रपतिभवने औपचारिकं स्वागतं भविष्यति। तदनु असौ राजघाटस्थलं प्रत्यपि यास्यति यत्र महात्मागान्धिने श्रद्धाकुसुमानि समर्पयिष्यति। तदनन्तरं राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया उपराष्ट्रपतिना जगदीपधनखडेन च साकं सम्वादं मेलनञ्च करिष्यति। डॉ. मोइज्जू-इत्यसौ श्वः आगरा-मुम्बइ-नगरौ प्रति प्रस्थास्यति। अवधेयं वर्तते यत् एषः राष्ट्रपतिः भारतस्य पञ्च दिवसीययात्रायां ह्यः नवदिल्लीं सम्प्राप्तवान्।

## अमितशाहः उपवेशनम्

केन्द्रीयगृहमन्त्री अमितशाहः अद्य नवदिल्ल्यां वामपन्थि-उग्रवाद-प्रभावितानां राज्यानां मुख्यमन्त्रिभिस्साकं समीक्षोपवेशनस्य एकस्य अध्यक्षतां विधास्यति। उपवेशने एतस्मिन् आन्ध्रप्रदेश-बिहार-छत्तीसगढ़-झारखण्ड-तेलङ्गाना-ओडिशा-महाराष्ट्र-मध्यप्रदेशानां मुख्यमन्त्रिणः सम्मिलिताः भविष्यन्ति। अपि च पञ्च केन्द्रीयमन्त्रिणः ये वामपन्थि-उग्रवाद-प्रभावित-राज्यानां विकासाय दत्तचित्ताः सन्ति ते अपि उपवेशने उपस्थिताः भविष्यन्ति। अत्रावधौ गृहमन्त्रालयेन प्रोक्तं यत् केन्द्रप्रशासनं षड्विंशत्यधिक-द्विसहस्रतमवर्षं यावत् वामपन्थि-उग्रवादशमनाय पूर्णतया प्रतिबद्धं वर्तते। तथा च गतदशवर्षाणां तत्सम्बद्धाः दत्तांशाः अपि प्रस्तुताः मन्त्रालयेन।

## जम्मूकश्मीर-निर्वाचनम्-मतगणना

जम्मूकश्मीर-हरियाणयोः विधानसभानिर्वाचनस्य मतगणना श्वो भविष्यति। केन्द्रशासित- प्रदेशे मतगणनायै सुदृढाव्यवस्था निष्पादिता। नवतिः सदस्यात्मिकायै जम्मूकश्मीर-विधानसभायै श्वः भविष्यमाणायै मतगणनायै जम्मूकश्मीरस्य सर्वेषु जनपदमुख्यालयेषु व्यापकप्रबन्धनानि विहितानि।

## उत्तरप्रदेश-कुम्भचिट्नम्

उत्तरप्रदेशस्य मुख्यमन्त्री योगीआदित्यनाथः ह्यः सङ्गमनगर्यां प्रयागराजे पञ्च विंशत्यधिक -द्विसहस्रतमवर्षाय महाकुम्भाय नवीनैः वर्णैः संवलितस्य एकस्य प्रतीकचिह्नस्य अनावरणं कृतवान्। इदं प्रतीक-चिह्नं धार्मिक-आर्थिक-समृद्धयोः प्रतीकं यस्मिन् समुद्रमन्थनात् बहिर्आगतः कलशः समङ्कितः। अवधेयं वर्तते यत् यूनेस्को इत्यनेन अमूर्त – सांस्कृतिक -न्यासत्वेन मान्यताप्राप्तं कुम्भमेलकं तीर्थयात्रिणां विश्वस्य बृहत् -शान्तिपूर्णसभारूपेण आमान्यते। अस्यादर्शवाक्यो वर्तते-सर्वसिद्धिप्रदः कुम्भः इति।

**भारतीय रिजर्वबैंकीति**

भारतीय-रिजर्व-बैंक-इत्येतस्य मौद्रिक-नीति-समित्याः त्रिदिवसीयोपवेशनम् अद्यारम्भ विधास्यते। विशेषज्ञानां परामर्शो विद्यते यत् भारतीय-रिजर्व-बैंकइति प्रमुख-वृद्धि-मूल्येषु यथास्थितिं निर्मातुं प्रयासरतो वर्तते। एम.पी.सी. इत्यस्य अध्यक्षः आर.बी.आई इत्यस्य प्रमुखः च बुधवासरे त्रिदिवसात्मकस्य उपवेशनस्य चर्चापरिणामान् उद्घोषयिष्यतः।

**क्रिकेट-प्रतिस्पर्धा**

पुरुषाणां क्रिकेट-प्रतिस्पर्धायां भारतेन ह्यः ग्वालियरे तिसृणां क्रिकेट-स्पर्धानां श्रृङ्खलायाः प्रथमे द्वन्द्वे बाङ्ग्लादेशः सप्तस्तोभः पराजितः।

॥ इति वार्ताः॥